अदैविकं प्रत्याब्दिकैकोद्दिष्टम्। अन्यत्र छायापचादौ नाधिकारः न नित्याधिकारः सपिण्डीकरणान्तानि यानि श्राद्धानि षोड़श। पृथङ्नैव सुताः कुर्य्युः पृथग्द्रव्या अपि क्वचिदित्यनापिना समुचितस्यापृथग्द्रव्यस्य पुंसः सपिण्डीकरणान्तानीति विशेषणात्तदुत्तरश्राद्धानां पृथक्त्वमपि प्रतीयते ॥ * ॥ मघात्रयोदशीनिमित्तके श्राद्धे पुत्त्रवता पिण्डा न देयाः।

"भौजङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम्।
तत्रापि महती पूजा कर्त्तव्या पितृदैवते।
ऋचे पिण्डप्रदानन्तु ज्येष्ठपुत्त्री विवर्जयेत्॥"

इति देवीपुराणात्। भौजङ्गी पञ्चमी। चन्द्रार्कसङ्गमोऽमावास्या। पितृदैवते ऋचे मघायाम्।

शातातपः।

"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते॥
अक्षय्यं दक्षिणा स्वस्ति सौमनस्यं यथास्थिति।"

इति तिथ्यादितत्त्वम्॥

मघाभवः, पुं, (मघायां भवः।) शुक्रग्रहः। इति हेमचन्द्रः॥ मघानक्षत्रजाते त्रि॥

मघाभूः, पुं, (मघायां मघासमीपस्थपूर्व्वफल्गुन्यां भवतीति भू + क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

मघी, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारणतयास्त्यस्या इति। मघा + अर्शआद्यच्। गौरादित्वात् ङीष्।) धान्यभेदः। इति मेदिनी। घे, ३॥

मघोनी, स्त्री, (मघोनः पत्नीति। मघवन् + स्त्रियां ङीप्। वकारस्य च सम्प्रसारणम्।) इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मङ्कुरः, पुं, (मङ्कयति भूषयतीति। मकि + बाहुलकादुरच्।) मुकुरः। इत्यमरटीकायां भरतः॥

मङ्क्ता, [ऋ] त्रि, (मज्जति स्नाति इति। मस्ज् + तृच्। "मस्जिनशोर्झलि।" ७।१।६०। इति नुम्।) स्नानकर्त्ता। इति मस्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम्॥

मङ्गः, पुं, (मङ्गति सर्पतीति मगि + अच्।) नौकाशिरः। इति हेमचन्द्रः॥

मङ्गलं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनास्मादिति। मगि + "मङ्गेरलच्।" उणा० ५।७०। इत्यलच्।) अभिप्रेतार्थसिद्धिः। इति तिथ्यादितत्त्वम्॥ तद्वति, त्रि। इत्यमरः॥ यथा, रामायणे। २।२३।३०।

"मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव॥"

तत्पर्य्यायः। भावुकम् २ भव्यम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६। क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ श्वःश्रेयसम् १० शिवम् ११ अरिष्टम् १२ कुशलम् १३ रिष्टम् १४ मद्रम् १५ शस्तम् १६। इति शब्दरत्नावली॥ (यथा, भागवते। ५। १४। ३४। -

"मङ्गलाय च लोकानां क्षेमाय च भवाय च।"

"कल्याणं मङ्गलं क्षेमं शातं शर्म्म शिवं शुभम्।

इति वैद्यकरत्नमालायाम्॥

शिखिहयगजगोधा रासभो भृङ्गराजो
मुखरपिककपोतौ पोतकी शूकरी वा।
तदनु विहगराजो मङ्गलाशंसिनः स्यु-
र्वदति शकुनवेत्ता वामतो निर्गमे वः॥"

इति हारीते द्वितीयस्थाने सप्तमेऽध्याये।) सर्व्वार्थरक्षणम्। इति मेदिनी। खे, १२०॥ * ॥

मङ्गललक्षणं यथा,—

"प्रशस्ताचरणं नित्यमप्रशस्तविवर्ज्जनम्।
एतद्धि मङ्गलं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः॥"

इत्येकादशीतत्त्वम्॥ * ॥

मङ्गलजनकद्रव्याणि। यथा,—

"पूर्णकुम्भं द्विजं वेश्यां शुक्लधान्यञ्च दर्पणम्।
दध्याज्यं मधु लाजञ्च पुष्पं दूर्व्वाक्षतं सितम्॥
वृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम्।
पणांश्च परिपक्वानि फलानि विविधानि च॥
पतिपुत्त्रवतीं नारीं प्रदीपं मणिमुत्तमम्।
मुक्तां प्रसूनमालाञ्च सद्योमांसञ्च चन्दनम्॥
ददर्शैतानि वस्तूनि मङ्गलानि पुरो मुने!।
शृगालं नकुलं चाषं शवं वामे शुभावहम्॥
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम्।
पारावतं शङ्खचिल्लं चक्रवाकञ्च मङ्गलम्॥
कृष्णसारञ्च सुरभीं चमरीं श्वेतचामरम्।
धेनुं वत्सप्रयुक्ताञ्च पताकां दक्षिणे शुभाम्॥
नानाप्रकारवाद्यञ्च शुश्राव मङ्गलध्वनिम्।
हरिशब्दस्य सङ्गीतं घण्टाशङ्खध्वनिन्तथा।
दृष्ट्वा श्रुत्वा स जगाम हर्षेण तात! मन्दिरम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः॥ * ॥ अपि च।

"ददर्श वर्त्मन्येवञ्च मङ्गलार्हं शुभप्रदम्।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलसूचकम्॥
वामे शवं शिवां पूर्णकुम्भं नकुलमेव च।
पतिपुत्त्रवतीं साध्वीं दिव्याभरणभूषिताम्॥
शुक्लपुष्पञ्च माल्यञ्च धान्यञ्च खञ्जनं शुभम्।
दक्षिणे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम्॥
वत्सप्रयुक्तां धेनुञ्च श्वेताश्वं राजहंसकम्।
वेश्याञ्च पुष्पमालाञ्च पताकां दधि पायसम्॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमीप्सितम्।
सद्योमांसं चन्दनञ्च माध्वीकं घृतमुत्तमम्॥
कृष्णसारं फलं लाजान् सिद्धान्नं दर्पणन्तथा।
विचित्रितं विशालञ्च सुदीप्तां प्रतिमान्तथा॥
चरणं ददर्श देवं तं पञ्चवक्त्रं त्रिलोचनम्।
शुद्धस्फटिकसङ्काशं नागराजैर्विराजितम्॥
शुक्लोत्पलं पद्मवनं शङ्खचिल्लञ्च कोरकम्।
मार्जारं पर्व्वतं मेघं मयूरशुकसारसम्॥
शङ्खकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम्।
विचित्रं कृष्णसङ्गीतं हरिशब्दं जयध्वनिम्॥
एवंभूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः।
प्रविवेश हरिं स्तुत्वा पुण्यं वृन्दावनं वनम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः॥ अन्यच्च।

"लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
एतानि शततं पश्येन्नमस्येदर्च्चयेत्ततः।
प्रदक्षिणन्तु कुर्व्वीत तथा चायुर्न हीयते॥
दूर्व्वा दधि सर्पिरथोदकुम्भं
धेनुं सवत्सां वृषभं सुवर्णम्।
मृन्मोमयं स्वस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च॥
श्वेतानि पुष्पाणि तथा शमीञ्च
हुताशनं चन्दनमर्कबिम्बम्।
अश्वत्थवृक्षञ्च समालभेत
ततश्च कुर्य्याद्द्विजजातिधर्म्मम्॥"

इति मत्स्यसूक्तमहातन्त्रे ४३ पटलः॥

वर्णभेदे मङ्गलप्रश्नभेदो यथा,—

"ब्राह्मणान् कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

मङ्गलः, पुं, (मगि + "मङ्गेरलच्।" उणा० ५।७०। इति अलच्।) ग्रहविशेषः। तत्पर्य्यायः। अङ्गारकः २ भौमः ३ कुजः ४ वक्रः ५ महीसुतः ६ वर्णार्च्चिः ७ लोहिताङ्गः ८ खोल्मुकः ९ ऋणान्तकः १०। इति शब्दरत्नावली॥ आरः ११ क्रूरदृक् १२ आवनेयः १३। इति ज्योतिषतत्त्वम्॥ स च रक्तगौरमिश्रितवर्णः। दक्षिणदिक्पुरुषक्षत्त्रियजातिसामवेदतमोगुणतिक्तरसमेषराशिप्रवालावन्तिदेशानामधिपतिः। मेषवाहनः। चतुरङ्गुलप्रमाणः। आरक्तमाल्यवसनः। भरद्वाजमुनिसन्तानः। चतुर्भुजः। शक्तिवराभयगदाधारी। सूर्य्याभिमुखः। अस्याधिदेवता कार्त्तिकेयः। प्रत्यधिदेवता पृथिवी। स तु पित्तप्रकृतिः। युवा। क्रूरः। वनचारी। मध्याह्नकाले प्रबलः। गैरिकादिधातुस्वामी। चतुष्पदानां प्रभुः। चतुष्कोणाकृतिः। सुवर्णकारादीनां स्वामी। ज्वलितभूमिचारी। किञ्चिदङ्गहीनः। कटुरसप्रियः। ताम्रवर्णरक्तद्रव्यस्वामी च। इति ग्रहयागतत्त्वलघुजातकादयः॥ * ॥ अस्योत्पत्तिर्यथा,—

"उपेन्द्रवीजात् पृथ्व्यान्तु मङ्गलः समजायत।
वसुन्धरायां बलवान् तन्मे व्याख्यातुमर्हसि॥

सौतिरुवाच।

उपेन्द्ररूपमालोक्य कामार्त्ता च वसुन्धरा।
विधाय सुन्दरी वेशमक्षता प्रौढ़यौवना॥
सस्मिता तस्य तल्पे च सहसा समुपस्थिता।
सुरम्यां मालतीमालां ददौ तस्मै वराङ्गना॥
उपेन्द्रस्तन्मनो ज्ञात्वा कामी मन्मथपीड़ितः।
नानाप्रकारशृङ्गारं चकार च तया सह॥
तदङ्गसङ्गमासक्ता मूर्च्छां प्राप सती तदा।
मृतेव निद्रिता वासौ वीर्य्याधानकृते हरौ॥
विहाय तत्र रहसि जगाम पुरुषोत्तमः।
उर्व्वशी पथि गच्छन्ती बोधयामास तां मुने!॥
सा च पप्रच्छ वृत्तान्तं कथयामास भूश्च ताम्।
वीर्य्यं सम्वरणं कर्त्तुं सा चाशक्ता च दुर्ब्बला॥
प्रवालस्याकरे न्यस्ता वीर्य्यन्यासं चकार सा।